# ।।प्रकरणम्-८ ।।

# ।। सांख्यदर्शनस्य महिमा ।।


| क्रमः | प्रकरणनाम | पृष्ठसंख्या |
|---|---|---|
| ८.१ | सांख्यदर्शनस्य स्रोतः । | 360-378 |
| ८.२ | सांख्यदर्शनस्य परम्परा । | |
| ८.३ | सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः । | |
| ८.४ | सांख्यदर्शनस्य तत्त्वविवेचनम् । | |
| ८.५ | सांख्यदर्शनेनैव भगवत्प्राप्तिः । | |
| ८.६ | सांख्यदर्शनेनैव भवबन्धनमुक्तिः । | |
| ८.७ | सांख्यदर्शनेनैव इष्टसिद्धिः । | |

प्रकरणम् ८ सांख्यदर्शनस्य महिमा ।

**स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः ।**
**निर्वैरः पूजितः सद्भिराप्तो ज्ञेयः स तादृशः[1]।।**

'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति मम शोधमहानिबन्धस्यान्तिमे 'सांख्यदर्शनस्य महिमा' इति नवमे प्रकरणे षट्सु दर्शनेषु सांख्यदर्शनस्य महिमा यथाशास्त्रं सप्तभिरुपप्रकरणैर्गीयते, तत्र सर्वो जीवो दुःखमुक्तिं वाञ्छति, किन्तु दुःखमुक्तये दुःखस्य नैकानि कारणानि सन्ति, तानि दुःखकारणानि दूरीकर्तव्यानि भवन्ति, तानि दुःखकारणामस्माकमन्तः सन्ति, दुःखकारणानि कदापि बाह्यानि भवितुं नार्हन्ति । विशेषरूपेण रागद्वेषौ कारणरूपेण वर्तेते, तयोर्दूरीकरणाय चित्तं वशीकर्तव्यं भवति । चित्तस्य वशीकरणाय यमनियमानां पालनं तथा ध्यायानाभ्यासोऽतीवावश्यको वर्तते । योगदर्शने पञ्च यमाः कथिताः सन्ति तद्यथा –

१. अहिंसा ।
२. सत्यम् ।
३. अचौर्य्यम् ।
४. ब्रह्मचर्य्यम् ।
५. अपरिग्रहः ।

अनेन प्रकारेण योगदर्शने कथितैर्यमैः प्राणिमात्रस्य प्रवृत्तेर्लक्ष्यमेकमात्रं सुखस्य प्राप्तिर्दुःखस्य परिहार एव वर्तते, अतो विचारशीलस्य प्राणिनः कृते वास्तविकं दुःखविषयकं

---
[1] सांख्यतत्त्वकौमुदी-प्रस्तावना- पृ. सं. ७४

ज्ञानमेवावश्यकमस्ति, यथा - महाकविः श्रीकालिदासः कथयति यद्-

**विकारं खलु परमार्थतोऽज्ञात्वाऽनारम्भः प्रतीकारस्य[१] ।**

**इदमेव सुखविषयकं ज्ञानं सांख्यदर्शनमेव प्रयच्छति तद्यथा -**

८.१ सांख्यदर्शनस्य स्रोतः ।

**कपिलं परमर्षिं च यं प्राहुर्यतयः सदा ।**

**अग्निः सः कपिलो नाम सांख्योयोगप्रवर्तकः[२] ।।**

**दशानामेव कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।**

**गर्भं माता सुधितं वक्षणास्ववेवन्तं तुषयन्ती बिभर्ति[३] ।।**

भारतीयदर्शनस्य क्षेत्रे सांख्यदर्शनस्याऽऽस्तिकदर्शनरूपे विशिष्टमेकं स्थानमस्ति, सांख्यदर्शनस्य वैदिकपरम्परामूलकानां सिद्धान्तानां प्राचीनता वर्तते, अतो भवदुःखनिवृत्तये सर्व्वेषामुपायानां रूपेण सांख्यदर्शनस्य शाश्वती उपादेयता तथा ग्राह्यताऽक्षुण्णा वर्तते, इत्थं विचिन्त्य सांख्यर्दनस्य स्रोतः संक्षेपेण प्रस्तूयते तद्यथा -

संख्यानमिति सांख्यमिति विग्रहे समुपसर्गात् 'चक्षिङ्-व्यक्तायां वाचि[४]' इति धातोः 'आतश्चोपसर्गे[५]' इति

---

[1] अभिज्ञानशाकुन्तलम्-३

[2] महाभारतम्-वनपर्व २२१।२१

[3] ऋग्वेदः १०।२७।१६

[4] अदादिधातुः १०८७

[5] पा. सू. ३।३।१०६

पाणिनीयसूत्रेण अङ्प्रत्यये, ङित्त्वात् 'आतो लोप इटि च[१]' इति पाणिनीयसूत्रेण धातोराकारस्य लोपे, स्वादिकार्य्ये स्त्रीत्वविवक्षायां 'संख्या' इति शब्दो निष्पद्यते, यस्य संख्याशब्दस्यार्थो भवति यद् - गणना, संख्याया इदम् इत्यर्थे 'तस्येदम्[२]' इति पाणिनीयसूत्रेण अण्प्रत्यये, णित्त्वाद् , आदिवृद्धौ, 'यस्येति च[३]' इति पाणिनीयसूत्रेण आकारस्य लोपे, स्वादिकार्य्ये सति, अथवा संख्यायाम्भवमिति सांख्यम् 'सांख्यम्' इति शब्दो निष्पद्यते,महाभारतकारो महाभारते सांख्यपदस्य विशिष्टमर्थमनेन प्रकारेण करोति तद्यथा -

**दोषाणां च गुणानां च प्रमाणं प्रविभागतः ।**
**कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्[४] ।।**

अनेन प्रकारेण सांख्यशास्त्रमिदं जन्मादीनां संस्काराणां वाहकरूपं सूक्ष्मशरीरं स्वीकरोति, अनया रीत्या सांख्यदर्शनमिदं सांख्यदर्शनस्य प्रक्रियायाम् ईश्वरस्य स्थानं नास्ति । भगवत्पतञ्जलिना विरचितं योगदर्शनमविद्याया दूरीकरणाय विशेषेण आवश्यकमस्ति, तस्मिन् योगदर्शनेऽष्टौ योगास्सन्ति । वेदार्थमेव स्पष्टीकर्तुं ज्ञानकर्मोपासनानां सिद्धान्ता अतिसरलतया भावगम्यया प्राञ्जलया भाषया विविधाभिर्भक्तशिरोमणीनां मानवमणीनां कथाभिः सम्यगवबोधिताः सन्ति, येषां व्यावहारिकीं स्थितिं सम्पादयन्तो वेदोपनिषत्प्रतिपाद्यं मानवानां प्रधानं लक्ष्यं परमात्मानं प्राप्य मुक्ता

1 पा. सू. ६।४।६४

2 पा. सू. ३।३।१०६

3 पा. सू. ६।४।६४

4 महाभारतम्-१२।११९।३४

भवितुमर्हन्ति, अतो वेदान्तो नाम उपनिषदादीनि शास्त्राण्येव वेदान्तः, श्रीअमरसिंहोऽमरकोशकारोऽमरकोशेऽन्तपदस्य नैकानर्थान् कथयति तद्यथा -

**अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनो स्त्रियाम्[१]।**

**अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम्[२]।**

अतो वेदान्तो नाम वेदोऽम्यते ज्ञायते प्राप्यते गम्यते अस्मिन्निति वेदान्तः, वेदा भगवतो वाङ्मयस्वरूपमस्ति, अतो भगवतो ज्ञानं वा प्राप्तिरनेन वेदान्तशास्त्रेण भवितुमर्हति । सांख्यशास्त्रस्य रचयितृषु सर्वप्रथमं स्थानं कपिलस्य वर्तते, अन्येऽपि सांख्यदर्शनस्य कर्तारस्सन्ति, तेषां नामान्यनेन प्रकारेण सन्ति तद्यथा -

१ कपिलः ।

२ आसुरिः ।

३ पञ्चशिखः ।

४ विन्ध्यवासी ।

५ जैगीषव्यः ।

६ वार्षगण्यः ।

७ वोढुः ।

८ सनकादयः ।

कपिलादासूरिणा प्राप्तमिदं ज्ञानं ततः पञ्चशिखेन तस्माद् भार्गव- उलूकवाल्मीकिहारीतदेवलप्रभृतीनाम्[३] ।

---

1 अमरकोशः २।८।११६

2 अमरकोशः ३।१।८१

3 माठरवृत्तिः - ७१

वायुपुराणमपि नैकेषां सांख्यशशास्त्रस्याचार्याणामुल्लेखमनेन प्रकारेण करोति तद्यथा –

**अन्नपादः कणादश्च उलूको वत्स एव च ।**

**योगात्मानो महात्मानो विमला शुद्धबुद्धयः[१]।।**

सांख्यदर्शनस्य नैके भाष्यकाराः सन्ति, तेषु विशेधरूपेण निम्नलिखिताः ख्यातिं प्राप्ताः सन्ति तद्यथा –

१ श्रीमदीश्वरकृष्णः ।

२ श्रीवाचस्पतिमिश्रः ।

३ उदयवीरशास्त्री ।

श्रीमदीश्वरकृष्णेन विरचितायाःसांख्यकारिकायाष्टीका नैका विद्वद्भिः प्रणीतास्सन्ति तद्यथा –

१ माठरवृत्तिः ।

२ युक्तिदीपिका ।

३ गौडपादभाष्यम् ।

४ जयमङ्गला ।

श्रीमदीश्वरकृष्णेन विरचितायाःसांख्यकारिकाया नैकासु टीकासु भगवता शङ्कराचार्येण प्रणीता जयमङ्गलानाम्नी टीका वर्तते । तत्र जयमङ्गलाटीकायामेकः श्लोको वर्तते तद्यथा –

**अभिगततत्त्वालोकं लोकोत्तरवादिनं प्रणम्य मुनिम् ।**

**क्रियते सप्ततिकारिकायाष्टीका जयमङ्गला नाम ।।**

६ सांख्यतत्त्वकौमुदी ।

---

[1] म. भा. सांख्यम्–पृ. सं. ४७

श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया नैकासु टीकासु आचार्यवाचस्पतिमिश्रेण प्रणीता सांख्यतत्त्वकौमुदीनाम्नी टीका वर्तते । इयं सांख्यतत्त्वकौमुदी श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया अत्यन्तमहत्त्वपूर्णा विस्तृता तथा मर्मस्पर्शिणी गम्भीररा च टीका वर्तते, अस्याः सांख्यतत्त्वकौमुद्या नैकाः प्रटीकाः सन्ति । उदयवीरशास्त्रिणा कृतस्य अर्वाचीनसांख्यसूत्रस्य 'अनिरुद्धवृत्तिः' नाम्न्याः टीकाकार आचार्योऽनिरुद्धो वर्तते,

७. सांख्यवृत्तिसारः ।

८. सांख्यप्रवचनभाष्यम् ।

९. लघुसांख्यवृत्तिः ।

१० सांख्यदर्शनस्य वर्ण्यविषयः ।

११ सांख्यसिद्धान्ताः ।

१२ त्रिविधं प्रमाणम् ।

१३ कालः ।

१४ पुरुषः ।

१५ मोक्षः ।

१६ जीवनमुक्तिः ।

१७ ईश्वरः ।

१८ सत्कार्यवादः ।

१९ वास्तववादः ।

२० सांख्यदर्शनस्य प्रवृत्तिः ।

२१ पुरुषबहुत्वम् ।

२२ कथमुपरागः ?

२३ सृष्टिक्रमः ।

२४ सदसत्ख्यातिः ।

२५ सांख्यदर्शनस्या पञ्चविंशतितत्त्वात्मनः स्वरूपम् ।

२६ सांख्यदर्शनस्य लोकोपयोगिता।

प्राणिमात्रस्य प्रवृत्तिः सुखं प्रति नितरां भवति । एकक्षणात्मकमपि दुःखं कोऽपि प्राणी नेच्छति । सांसारिकैर्दुःखैरुद्विग्ना भूत्वा केचन मनुष्या आत्महत्यामपि कर्तुं प्रवर्तन्ते, अनेन प्रकोरण एकक्षणात्मकमपि दुःखं दर्शं दर्शं विद्वांसः सदा सर्वदा सर्वथा च कथयन्ति यथा - दुःखादुद्विजते लोकः सर्वस्य सुखमीप्सितम् , किन्तु किमस्ति सुखम् ? किं सुखस्वरूपम् ? सुखविषयकाणां प्रश्नानां समाधानं कर्तुं जनसमाजोऽपि क्षमः । केचन कामोपभोगेनेन्द्रियाणां तृप्तिरेव परमं सुखमिति मन्यन्ते, किन्तु तत्त्वज्ञा विद्वांसः कथयन्ति यत् - तत्सुखं दुःखमिश्रितत्वात् त्याज्यमस्ति, एतस्मात्कारणादैहिकसुखोपभोगदुःखं विषमिश्रितमधुतुल्यं सन्त्यज्य ऐकान्तिकस्यात्यन्तिकस्य च गुणस्य गवेषणाय तदुपलब्धये च तत्त्वज्ञाः सर्वे परावारापराश्रीणाः विद्वांसः प्रयत्नशीला भूत्वा दुःखसागरे निमग्नानां साधारणानां जनानामुद्धारणार्थं सततं प्रचारं प्रसारं च कुर्वन्ति, इदमेव दर्शनशास्त्राणां सर्वेषां प्रामुख्यमुद्देश्यमेकमेव वर्तते । तत्र सर्वेषु वेदेषु निहितस्य सांख्यज्ञानस्य सूत्रेषु ग्रथितं कृत्वा शिष्यपरम्पराद्वारा प्रचारः प्रसारश्च कृतो वर्तते । भारतीयसंस्कृतौ सांख्यदर्शनस्य महत्त्वपूर्णं स्थानमस्ति, अतो विद्वांसः सांख्यदर्शनमनेन प्रकारेण प्रशंसन्ति तद्यथा -

**नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम् ।**

**अत्र वः संशयो मा भूज्ज्ञानं सांख्यं परं स्मृतम्[1] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'सांख्यदर्शनस्य स्रोतः' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

८.२ सांख्यदर्शनस्य परम्परा ।

**पुरुषार्थज्ञानमिदं गुह्यम्परमर्षिणा समाख्यातम् ।**
**स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्[2] ।।**

इदं सांख्यदर्शनस्य गुह्यं पुरुषार्थस्य ज्ञानं परमर्षिणा कपिलेन गुरुपरम्परया समाख्यातमस्ति, यस्मिन् सांख्यशास्त्रस्य ज्ञाने समेषां भूतानां स्थित्युत्पत्तिप्रलयानां चिन्तनं कृतमस्ति , अतः सांख्यदर्शनकारो मुनिश्रेष्ठः कपिलः सर्वप्रथममासुरये ददाति तद्यथा –

**एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतन्तन्त्रम्[3] ।।**

एतत्पवित्रं सांख्यदर्शनज्ञानमासुरिर्मोक्षम्प्राप्नुयादिति हेतोरासुरये प्रदत्तमस्ति, तथैवाऽऽसुरिणेदं सांख्यज्ञानं पञ्चशिखाय नामकाय शिष्याय प्रदत्तमस्ति, तेन पञ्चशिखेनाऽऽचार्य्येण विविधप्रकारेण सांख्यतन्त्रस्य रचनां कृत्वा सांख्यशास्त्रस्य विशेषेण प्रचारः प्रसारः कृतो वर्तते, तदनन्तरं सांख्यदर्शनस्य प्रचारं प्रसारमियं सांख्यकारिका कथयति तद्यथा –

**शिष्यपरम्परयाऽऽगमीश्वरकृष्णेन चैतदार्याभिः ।**
**संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम्[1] ।।**

---

1 महाभारतम्–शान्तिपर्व ३१६.२

2 सांख्यतत्त्वकौमुदी–प्रस्तावना– पृ. सं. ६९

3 सांख्यतत्त्वकौमुदी–प्रस्तावना– पृ. सं. ७०

इयं सांख्यदर्शनस्य परम्परा श्रीमदीश्वरकृष्णनामकेन शिष्येण वर्धिता पोषिता सांख्यदर्शनकारिका विद्यते, श्रीमदीश्वरकृष्णनामकेन शिष्यश्रेष्ठेन विरचितायां तस्यां सांख्यकारिकायां द्विसप्ततिः (७२) कारिकाः सन्ति अनेन प्रकारेण पुराणेषु चर्चितं 'सांख्यदर्शनस्य परम्परा' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

८.३ सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः ।

**असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात्कारणाभावाच्च सत्कार्य्यम्**[२] **।।**

सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणो वर्तते, तत्र भारतीयदर्शनशास्त्राणां मुख्यं लक्ष्यं दुःखमुक्तिर्वामोक्षो वर्तते, आत्यन्तिकायास्तथैकात्मिकाया दुःखमुक्तेरिच्छैव दर्शनशस्त्राणां मूलमस्ति, केवलं बुद्धिव्यवसायायाँ साधनमेव दर्शनं नास्ति, मुग्धा बुद्धिर्दर्शनशास्त्रे प्रवृत्ता न भवति, परन्तु दुःखं प्रयोजनवती बुद्धिदर्शनशास्त्रे प्रवर्तते । सांख्याचार्याणामयं सिद्धान्तो वर्तते यथा –

सतः सज्जायते ।

सत एव सत्प्रभवति, अस्तित्ववतो वस्तुनोऽस्तित्ववद्वस्तूत्पद्यते, स्वस्य उत्पत्तेः पूर्वं कारणेऽस्तित्वं भवति, अथवा कारणमेव कार्य्यस्याव्यक्तावस्था वर्तते, स्वोत्पत्तेः पूर्वं कार्यं

---

[1] सांख्यतत्त्वकौमुदी-प्रस्तावना- पृ. सं. ७१

[2] सांख्यकारिका-९

कारणेऽव्यक्तभावेन वा सूक्ष्मरूपेण स्थितं कार्यं वयमिन्द्रियजेन प्रत्यक्षं कर्तुं न प्रभवामः, किन्तु तस्मात्कार्यं तदा कारणेऽस्तित्वं नायाति इत्थं कथयितुं न कोऽपि शक्नोति, अतो यद्वस्तु यस्मिन्नास्ति, ततः कदाति नोत्पद्यते । कार्यं कारणस्य परिणामो वर्तते, अयमेव सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः तस्य सत्कार्यवादस्य पञ्चविधस्य नामान्यनेन प्रकारेण सन्ति तद्यथा –

| | | | | |
|---|---|---|---|---|
| १. | असदकरणात् । | २. | उपादानग्रहणात् | । |
| ३. | सर्वसम्भवाभावात् । | ४. | शक्तस्य शक्यकरणात् | । |
| ५. | कारणाभावात् । | | | |

घटादीनि कार्य्याणि स्वोत्पत्तेः प्रागेव विद्यमानमस्ति तदा तस्योत्पत्तये कुम्भकारादीनां व्यापारस्यावश्यकता नास्ति, अस्याः शङ्काया निराकरणं भवति यत् – कुम्भकारादीनां व्यापारेण घटादीनां कार्य्याणां केवलमभिव्यक्तिर्भवति । सत्कार्यवादस्य द्वितीयोऽयं सिद्धान्तो वर्तते यद् – उपादानग्रहणात् । यत्कार्य्यमुत्पत्तेः पूर्वं तस्य कारणे विद्यमानं न भवति, तदा वयममुकं कार्य्यमुत्पादयितुमुपादानकारणस्य ग्रहणं कुर्मस्तदेवोपादानग्रहणम् । आम्रफलम् उत्पादयितु वयमाम्रबीजस्य वपनं कुर्मः, तत्रार्कबीजस्य वपनं कदापि न कुर्मः, यदुत्पत्तेः पूर्वमाम्रफलम् उत्पादयितु वयमाम्रबीजस्यैव वपनं कुर्मः, तत्रार्कबीजस्य वपनं कदापि न कुर्मः, अनेन कारणेनोत्पत्तेः पूर्वमाम्रफलस्यास्तित्वमाम्रबीजे पश्यामः, सत्कार्यवादस्य तृतीयोऽयं सिद्धान्तो वर्तते यत् – सर्वसम्भवाभावात् । यदुत्पत्तेः पूर्वं कार्य्यमसन्मन्यते, तत्काले सत्कारणासत्कार्य्ययोर्मध्ये कश्चिदपि सम्बन्धो भवितुं नार्हति, कारणमस्ति यत् – सम्बन्धस्तु

द्वयोर्वस्तुनो मध्ये सम्भवितुं शक्यते, असम्बद्धमपि यत्तदेव करोति यत्र यत्कारणं शक्तं भवति । शक्तिश्च कारणस्य कार्यस्य दर्शनादेवागम्यते, तद्यथा – मृद्रूपे कारणे घटरूपं कार्य्यं समुत्पादयितुं शक्तिरस्ति, सा शक्तिः पटमुत्पादयितुं नास्ति, अतः सा मृद् घटमुत्पादयितुं शक्तिरस्ति, किन्तु सा पटमुत्पादयितुं शक्तिर्नास्ति, अनेन विज्ञायते यत्कारणगताया उत्पादकशक्तेर्ज्ञानं कार्य्यमवलोक्य भवति । कारणस्य या जातिर्भवति, सैव जातिः कार्य्यस्य भवति, यथा – गोधूमाद् गोधूमा एव जायन्ते, आम्रबीजादाम्रबीजान्ये भवन्ति, अथवा गोधूमात्कदापि आम्रफलानि भवितुं नार्हन्ति, अतः कार्य्यं कारणात्कमेव भवति, कार्य्यं कारणाद्भिन्नं कदापि न भवति । कारणं यदा सद्भवति, तदा कार्य्यमसत्कथं भवितुमर्हति ? कारणगतां सत्तां विना विपरीता सत्ता भवितुन्नार्हति, न पटस्तन्तुभ्यो भिद्यते तद्धर्म्मत्वादिति, अतो यद्यतो भिद्यते तत्तस्य धर्मो भवितुं नार्हति यथा – गौरश्वस्य । धर्मश्च पटस्तन्तूनाम् , तस्मान्नार्थान्तरम् । उपादानोपादेयभावाच्च नार्थान्तरं तन्तुपटयोः । योग्यतावच्छिन्ना धर्मिणः शक्तिरेव धर्मः, अर्थाद् धर्मिर्णो योग्यतायुता शक्तिरेव धर्मः । अनेन प्रकारेण पुराणेषु चर्चितं 'सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

## ८.४ सांख्यदर्शनस्य तत्त्वविवेचनम् ।

प्रकृतिः पुरुषार्थं बुद्धिरूपेणात्मानं सप्तभी रूपैर्बध्नाति, सैव प्रकृतिः एकरूपेणात्मानं विमोचयति, तेषां सर्वेषां सप्तानां रूपाणां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. धर्मः ।

२. वैराग्यम् ।

३. ऐश्वर्य्यम् ।

४. अधर्मः ।

५. अज्ञानम् ।

६. अवैराग्यम् ।

७. अनैश्वर्यम् ।

वैराग्योपरत्यादीनामभावेऽपि ज्ञानेनापि मोक्षो भवति, अर्थाज्ज्ञानमेव मोक्षस्य हेतुरस्ति, तत्र वेदान्तिनः कथयन्ति यद् -

**पूर्णाबोधे तदन्यौ द्वौ प्रतिबद्धो यदा तदा ।**

**मोक्षो विनिश्चितः किन्तु दृष्टदुःखं न नश्यति[१] ।।**

इममेव विषयमादाय सांख्यदर्शनस्य तत्त्वविवेचनम्

अनेन प्रकारेण पुराणेषु चर्चितं 'सांख्यदर्शनस्य पञ्चविंशतितत्त्वानां ज्ञानेन किम्भवितुर्महति ? अथवा को लाभः ? इति प्रश्नं समाधातुं स्वयं सांख्यतत्त्वकौमुदीकारो लिखति यद् -

**एवन्तत्त्वाभ्यासन्नास्मि न मे नाहमित्यपरिशेषम् ।**

**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्[२] ।।**

तत्त्वज्ञानस्य पुनः पुनः प्रयत्नं कृत्वा अयमात्मा क्रियावान्नास्ति, अनेन आत्मनि स्वामित्वस्य निषेधः सूचितो भवति, तथैवात्मा कर्ता नास्तीत्यपि ज्ञानं भवति, अनेन प्रकारेणात्मनि कर्तृत्वस्य निषेधः सूचितो भवति । कथनस्य तात्पर्य्यमिदमस्ति यद् -

---

[1] सांख्यतत्त्वकौमुदी-पृ. सं. २९०

[2] सांख्यतत्त्वकौमुदी-प्रस्तावना- पृ. सं. ७०

आत्मा क्रियास्वामिताकर्तृतावद्भिन्नो वर्तते, इममेव विचारं प्रधार्य्य स्वयमेव लिखति यथा –

**नास्ति किञ्चित्परिशिष्टं ज्ञातव्यं यत्र तत्[1] ।।**

संशयविपर्य्ययविकल्पेन भिन्नत्वेन कैवल्यं प्रति प्रयोजकं केवलं ज्ञानमेव उत्पद्यते, तत्त्वन्नाम वास्तविकं ज्ञानम् , प्रकृते तु प्रकृतेः पुरुषस्य पृथक्त्वमेव वास्तविकमस्ति, अनेन सिद्धमिदस्ति तदा तस्याभ्यासः केन प्रकारेण संभवो वर्तते ? कथं यत्पौनःपुन्यलक्षणाभ्यासस्तु साध्यस्यैव संभवो वर्तते, अतोऽभ्यासेन तत्त्वज्ञानस्य उत्पत्तर्भवति , अर्थात्तत्त्वविषयश्चाभ्यास इति तत्त्वस्य साक्षात्कारं जनयति । तत्त्वज्ञानस्य विशुद्धिहेतुरविपर्य्ययाभावो वर्तते, एवं तत्त्वज्ञानस्य विशुद्धतायां हेतुरविपर्य्ययाभावो विद्यते । संशयाभवस्य प्रतीतिः केन प्रकारेण प्रतीतिर्भवति ? तर्हि मिथ्याज्ञानमेव विपर्य्ययः, तथैव 'पुरुषस्य चैतन्यम्' अत्रमभेदे भेदस्यारोपको विकल्पोऽपि ज्ञानविरोधित्वाद्विपर्य्येण संगृहीतो भवति । एकधर्मिकभावाऽभावमेव विषयज्ञानम् । अनादिमिथ्याज्ञानस्य संस्काराणां सादितत्त्वज्ञानस्य संस्कारेण नाशो भवति , तत्त्वसाक्षात्कारस्य फलं कथयति यथा –

**तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम् ।**
**प्रकृतिम्पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वच्छः[2] ।।**

विशुद्धतत्त्वज्ञानेन स्वच्छः प्रेक्षकसमानो निष्क्रियः पुरुषो विवेकख्यातिप्रयोजनेन प्रकृतिम्पश्यति, अनेन प्रकारेण पुराणेषु चर्चितं

---

[1] सांख्यतत्त्वकौमुदी- पृ. सं. २९१
[2] सांख्यतत्त्वकौमुदी-कारिकासंख्या-६५

'सांख्यदर्शनस्य तत्त्वविवेचनम्' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

८.५ सांख्यदर्शनेनैव भगवत्प्राप्तिः ।

**प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ।**

**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति[१] ।।**

जीवितं मरणं जन्तोः[२] इति भागवतवचनानुसारं स्वकीयानां विषयाणाम् अतिक्रमणं न कृत्वा शब्दादिविषयकाणामिन्द्रियाणां यदा स्ववशमात्मा करोति, तदा स्वयमेवात्मा तप आचरति, इत्थम्भूतः स्वमिन्नेव सम्पूर्णलोकेषु व्याप्तस्तथा स्वयमेव सम्पूर्णलोकान् देवतास्वरूपेण पश्यति, यथा - पुष्करपलाशमापो न श्लिष्यन्ते, एवम्प्रकारेण पापं कर्म न श्लिष्यते, तथैवात्मज्ञानिनं पापानि स्पर्शं न कुर्व्वन्ति, यथा - ईषीकातूलमग्नौ प्रोतं प्रदूयतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते, ब्रह्मसूत्रकारः कथयति तद्यथा -

**तदभिगमे उत्तरपूर्वाधयोरश्लेषविनाशो तद्व्यपदेशात्[३] ।।**

परमात्मनो लिङ्गशरीरावच्छिन्नांशस्य मायिकलिङ्गशरीरस्य नाशे सति परमात्मानं संप्राप्य पुनः निवृत्तो न भवति, किन्तु तत्त्वज्ञानेन तस्य मोक्षो भवति, स्वयं श्रीशुकस्य मुखकमलान्निर्गताः भगवत्प्राप्तिविषयाः श्लोकाः कथयन्ति यद् -

---

[1] सांख्यतत्त्वकौमुदी-कारिकासंख्या-६८

[2] श्री. भा. १२।६।२५

[3] सांख्यतत्त्वकौमुदी- पृ. सं. ३०६

**निरूपितेयं त्रिविधा निर्मूला मतिरात्मनि ।**
**इदं गुणमयं विद्धि त्रिविधं मायया कृतम् ।।**
**एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणम् ।**
**न निन्दति न च स्तौति लोके चरति सूर्यवत्[1] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'सांख्यदर्शनस्य भगवत्प्राप्तिः' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

८.६ सांख्यदर्शनेनैव भवबन्धनमुक्तिः ।

सर्व्वा नद्यः समुद्रं सम्प्राप्य स्वस्य नाम स्वरूपं च परित्यजन्ति तथा महत्यो वा लघ्व्यो नद्यः महतीषु नदीषु वा मत्सु नदेषु विलीना भवन्ति, तथैव जीवात्मा परमात्मनि विलीना भवन्ति, अयमेव भवबन्धनमुक्तिर्वर्तते । पापानां पुण्यानां च क्षयो वा तत्प्राप्तानां सुखदुःखदीनां फलानां नाशो भवति, तस्मिन्समये समस्तेषु सांसारिकेषु पदार्थेष्वासक्तिरहितो जीव आकाशसमाननिर्लेपः, निर्गुणे परमात्मनि स्थितो तं परमात्मानं साक्षात्करोति । वेदेषु द्वावात्मानौ कथितौ वर्तेते, तयोरेक आसक्तियुतो जीवात्मा यदाऽऽसक्तिरहितो भूत्वा विषयेभ्यः पूर्णतया निर्वृत्तो भवति, तदा स मुक्तः कथितः, सांख्यदर्शनस्य मत इदमेव मोक्षस्य लक्षणमस्ति, सांख्यदर्शनस्य पन्थानमनुसृत्य सर्वेषां पुराणानां सांख्यदर्शनस्य मोक्षस्वरूपविषयाः श्लोकाः सांख्यदर्शनस्य मोक्षस्वरूपं कथयन्ति तद्यथा –

**अस्मात्स्वर्गापवर्गौ च मानुष्यनारकावपि ।**

---
[1] श्री. भा. ११।३१।५

**तिरक्त्वमथवाप्यन्यन्नरः प्राप्नोति वै द्विज[१] ।।**

**दिवं यास्यन्तु मे पूर्वे गङ्गातोयाप्लुतास्थिकाः ।**

**तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता[२] ।।**

**दिवं यास्यन्तु मे पूर्वे गङ्गातोयाप्लुतास्थिकाः ।**

**तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता[३] ।।**

अनेन प्रकारेण पुराणेषु चर्चितं 'सांख्यदर्शनेनैव भवबन्धनमुक्तिः' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा समाप्नोमि ।

८.७ सांख्यदर्शनेनैव इष्टसिद्धिः ।

सांख्यदर्शनेनेष्टसिद्धिर्भवति, तत्र सिद्धिर्नाम पुरुषार्थस्य निष्पत्तिर्वर्तते । श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यतत्त्वकौमुद्याः कारिकेयं मुख्यानां गौणानां च सिद्धीनां वर्णनं करोति तद्यथा -

**ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।**

**दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः[४] ।।**

जीवितं मरणं जन्तोः[५] इति भागवतवचनानुसारं स्वकीयानां विषयाणां निवृत्तयेऽष्टौ सिद्धयः सन्ति तद्यथा -

---

1 श्रीमार्कण्डेयपुराणम् ५२।२३

2 श्रीमत्स्यपुराणम् १२१।२७

3 श्रीमत्स्यपुराणम् १२१।२७

4 सांख्यतत्त्वकौमुदी-कारिकासंख्या-५१

5 श्री. भा. १२।६।२५

१. आध्यात्मिकदुःखाभावः ।

२. आधिदैविकदुःखाभावः ।

३. आधिभौतिकदुःखाभावः ।

४. अध्ययनम् ।

५. शब्दः ।

६. ऊहः ।

७. सुहृत्प्राप्तिः ।

८. दानम् ।

एतास्वष्टसु सिद्धिषु विहन्यमानस्य दुःखस्य त्रित्वात्तद्विघाता आद्याः तिस्रः सिद्धयः सन्ति, तथाऽध्ययनादितत्त्वज्ञानात्मिकाः पञ्च सिद्धयो वर्तन्ते, एताः पञ्च सिद्धयो गौणात्मिका विद्यन्ते । तत्र विधिवद्गुरुमुखादध्यात्मविद्यानाम् अक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते । शब्दजनितमर्थज्ञानमुपलक्षयति, कार्ये कारणोपचारात्सा द्वितीया सिद्धिः सुतारमुच्यते । ऊहः तर्कः, आगमाविरोधिन्यायेन आगमार्थपरीक्षणमेव सा तृतीया सिद्धिः तारतारमुच्यते । सुहृत्प्राप्तिरित्यनेन स्वयम्परीक्षितमप्यर्थं न श्रद्दधते, न यावद्गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते, सा चतुर्थी सिद्धिः रम्यकमुच्यते । इयं दानाख्या पञ्चमी सिद्धिः सदामुदितमुच्यते, इत्थं पञ्च तारमित्यादयः सिद्धयः सन्ति तद्यथा –

१. तारम् ।

२. सुतारम् ।

३. तारतारम् ।

४. रम्यकम् ।

५. सदामुदितम् ।

सम्पूर्णस्य संसारस्यास्तित्वमपि जीवस्य भोगापवर्गस्य सिद्धये वर्तते, अपवर्गो नाम मोक्षः कथितोऽस्ति, अतः सम्पूर्णानां दुःखानामैकान्तिकस्यात्यन्तिकस्य निवृत्तये सांख्यदर्शनं परमं सहायकमस्ति । सांख्यदर्शनस्य सर्व्वेषां सिद्धान्तानामुल्लेखः सर्वेषु पुराणेषु निहितो वर्तते, अतः सर्व्वासां सिद्धीनां वर्ण्णनं कुर्वन् लिङ्गपुराणे श्रीसूतः कथयति तद्यथा –

**स्वल्पषट्सिद्धिसंत्यागात्सिद्धिदाः सिद्धयो मुनेः ।**
**प्रतिभा प्रतिभावृत्तिः प्रतिभाव इति स्थितिः[१] ।।**

अनेन प्रकारेणाष्टौ सिद्धयः सांख्यदर्शनज्ञानेन भवन्ति, इत्थं पुराणेषु चर्चितं 'सांख्यदर्शनेनैव इष्टसिद्धिः' इति मम शोधमहानिबन्धस्य विषयं चर्चयित्वा 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति मम शोधमहानिबन्धस्याष्टमे प्रकरणे मया सांख्यदर्शनस्य स्रोतः, सांख्यदर्शनस्य परम्परा, सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः, सांख्यदर्शनस्य तत्त्वविवेचनम् , सांख्यदर्शनेनैव भगवत्प्राप्तिः, सांख्यदर्शनेनैव भवबन्धनमुक्तिः, सांख्यदर्शनेनैव इष्टसिद्धिः, इत्थं सप्तोपप्रकरणानि यथामति विशदय्याष्टमम्प्रकरणमत्रैव समाप्नोमि ।

---

[1] लिङ्गपुराणम्-९।१६